**दिनाङ्क :- 15.08.2024** **सायम् - 06:20**

# इयम् आकाशवाणी

**<u>आदौ-मुख्यवार्ता:</u>**

- प्रधानमन्त्री नरेन्द्रमोदी अद्य सेमी कंडक्टर इति अर्धचालकनिर्माणे वैश्विकनेतृत्वं प्राप्तुं, आयातनिर्भरतां न्यूनीकर्तुं, प्रौद्योगिक्यां आत्मनिर्भरतां वर्धयितुं च भारतस्य प्रतिबद्धतां उल्लिखिवान्।

- प्रधानमन्त्रिणा राष्ट्रे साम्प्रदायिक-नागरिकसंहिताया: स्थाने धर्मनिरपेक्ष-नागरिकसंहिता भवेदिति विषयम् सबलं प्रतिपादितम्।
- प्रधानमन्त्रिणा प्रोक्तं यत् राष्ट्रे महिलोत्पीडनं प्रति रोषस्यभाव: सम्बर्धितोऽस्ति। महिलाभि: सह कृतापराधानां शीघ्रातिशीघ्रतया पर्यवेक्षणं, दोषिणश्च प्रति शीघ्रतयैव दोषनिर्धारणं भवेत्।

- श्रीमोदी आशां प्रकटितवान् यत् बांग्लादेशे स्थिति: शीघ्रातिशीघ्रं सामान्या भविष्यतीति।

- **अपि च**

- पश्चिमबङ्गे कोलकातानगरस्य आर जी कर चिकित्सा महाविद्यालये चिकित्सिकायाः निर्ममबलात्कारस्य हत्यायाः विरोधं कुर्वन्ति स्म तदा उपद्रविनां समूहः चिकित्सकानां विरोधप्रदर्शनस्थले आक्रमणं कृतवान्।

## स्वतंत्रता दिवस प्रधानमंत्री

प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रस्य अष्टसप्ततितमस्य स्वतन्त्रतादिवसस्योपलक्ष्ये देशवासिभ्यः वर्धापनानि प्रदत्तवान्। रक्त-दुर्गस्य प्राचीरात् स्वीयसम्बोधने श्रीमोदी उक्तवान् यत् अद्य अस्यां शुभवेलायां देशस्य स्वातन्त्र्यै कृते प्राणाहूतिं प्रदातृणां, आजीवनं यावत् संघर्षरतानां च स्मरणं कुर्मः । प्रधानमन्त्री नरेन्द्रमोदी अद्य सेमी कंडक्टर इति अर्धचालकनिर्माणे वैश्विकनेतृत्वं प्राप्तुं, आयातनिर्भरतां न्यूनीकर्तुं, प्रौद्योगिक्यां आत्मनिर्भरतां वर्धयितुं च भारतस्य प्रतिबद्धतां उल्लिखिवान्। अद्य प्रातः रक्तदुर्गे राष्ट्रध्वजोत्तोलनानन्तरं प्रधानमन्त्री स्वीयोद्बोधने भारतस्य विकासस्य दिशां निर्धारयिष्यमाणानां भविष्यस्य लक्ष्याणां विषये च विस्तरेण प्रतिपादितवान्। सः देशं निर्माण-गेमिङ्ग्-डिजाइनिंग् इत्यादिषु विविधक्षेत्रेषु वैश्विकनेतृत्व-स्थापनार्थं च नवाचारस्य आवश्यकतायाः उपरि बलं दत्तवान् ।

सः प्रकाशितवान् यत् समाजस्य प्रत्येकं वर्गस्य जनाः, युवानः, कृषकाः, महिलाः, आदिवासीजनाः च दासतायाः विरुद्धं संघर्षं कृतवन्तः। सः अवदत् यत् अद्य राष्ट्रस्य रक्षणाय, पूर्णप्रतिबद्धतया सह निर्माणाय, देशं नूतन-उच्चतां प्रति नेतुम् च समर्पितानां श्रेष्ठजनानाम् अपि नमनस्य अयम् अवसरः अस्ति | प्रधानमन्त्रिणा विश्वासः प्रकटितः यत् यदि देशस्य चत्वारिंशदधिकैकशत कोटि जनाः संकल्पं कृत्वा एकस्मिन् दिशि एकत्रितैव भूत्वा गच्छन्ति तर्हि सर्वान् विघ्नान् अतिक्रम्य भारतं सप्तचत्वारिंशदधिक-द्विसहस्र-तमवर्षपर्यन्तं 'विकसितभारतं' भविष्यति। श्रीमोदिना उक्तं यत् तस्य सर्वकारेण राष्ट्रप्रथमनीत्या सह बहवः परिष्काराः विहिताः ।

सः अवदत्, यत् सः एतत् ज्ञात्वा प्रसन्नतामनुभवति यत् कोटिशः नागरिकाः 'विकसित-भारत-सप्तचत्वारिंशदधिक-द्विसहस्रम्' इत्यस्य कृते असंख्या:-पारिष्कारोपाया: दत्तवन्तः |सम्प्रति प्राकृतिकआपदानाम् उदये चिन्ताम् प्रकटयता प्रधानमन्त्रिणा उक्तं यत् तस्य सहानुभूतिः प्रभावितैः सह अस्ति। अस्मिन् समाव्हानात्मककाले देश: तैः सह अस्ति इति सः आश्वासितवान्। प्रधानमन्त्री श्रीमोदी उक्तवान्, यत् तस्य सर्वकारः न हि प्रशंसावसात् न च बाध्यतावसात् , अपितु देशस्य सुदृढीकरणाय परिष्काराय च प्रतिबद्धः अस्ति। तेन ख्यापितं यत् प्रत्येकस्मिन् क्षेत्रे पर्यटनम्, एमएसएमई, शिक्षा, स्वास्थ्यं, परिवहनं, कृषिः क्षेत्रे वा उन्नतव्यवस्था वर्तते। सः अवदत् यत् भारतं विश्वस्य उत्तमप्रथान् अग्रे आनीय नेतृत्वं कर्तुम् इच्छति। प्रधानमन्त्रिणा उक्तं यत्, अन्तरिक्षक्षेत्रं भारतं सुदृढं राष्ट्रं कर्तुं अत्यावश्यकं तत्त्वं वर्तते तथा च अस्मिन् क्षेत्रे कृतानां बहूनां परिवर्तनानाम् अपि उल्लेखं स: कृतवान्।

श्रीमोदिना स्वकीयोद्बोधने अग्रे योजितं यत् भारतदेश: इत:पूर्वं आततायिनां क्रूराक्रमणै: ग्रस्त: आसीत् परं सम्प्रति अस्मिन् देशे शौर्यदृढतयो: समावेश: सञ्जातोऽस्ति। तेनोक्तं यत् देशस्य सशस्त्र-सेना: सर्जिकल-स्ट्राइक इति सैन्यशल्याक्रमणं कुर्वन्ति, यस्मिन् वयं देशवासिन: गर्वानुभूतिं कुर्म: । दौर्भाग्येन स्वातन्त्र्यानन्तरं जना: सहायतायै सर्वकारस्य मुखापेक्षिण: भवन्ति स्म। श्रीमोदी अवदत् यत् परं तस्य प्रशासनेन सर्वकारस्य प्रशासनिक-संरचनैव परिवर्तिता, सम्प्रति च शासनं स्वयमेव लाभार्थिन: प्रति याति। तेनोक्तं यत् अद्य प्रशासनम् जनेभ्य: वातीन्धनम्, जलम्, विद्युतम्, वित्तीय-सहायता च प्रददाति। श्रीमोदिना भणितं यत् गतदशवर्षेषु दशकोटिमहिला: स्वयं सहायतासमूहै: सह संयुज्य वित्तीयरूपेण आत्मनिर्भरा: सञ्जाता: सन्ति । तेनोक्तं यत् महिला: परिवारे नीतिनिर्धारका:

सञ्जातास्सन्ति। प्रधानमन्त्रिणा प्रोक्तं यत् तस्य प्रशासनेन स्वयं सहायताप्राप्त-समूहेभ्य: साम्प्रतं यावत् नवलक्षकोटि-रूप्यकाणि प्रदत्तानि। प्रधानमन्त्रिणा प्रोक्तं यत् राष्ट्रे महिलोत्पीडनं प्रति रोषस्यभाव: सम्बर्धितोऽस्ति। महिलाभि: सह कृतापराधानां शीघ्रातिशीघ्रतया पर्यवेक्षणं, दोषिणश्च प्रति शीघ्रतयैव दोषनिर्धारणं भवेत्। प्रचार-प्रसार तन्त्रेषु अपराधस्य चर्चा तु सजवं प्राचुर्येण च क्रियते, परं दण्डितानां चर्चा तथैव न भवति। दण्डितानां विषयेऽपि आधिक्येन चर्चा भवितव्या। येन जघन्यापराधमभिलक्ष्य जनेषु भय: स्यादिति। प्रधानमन्त्रिणा राष्ट्रे साम्प्रदायिक-नागरिकसंहिताया: स्थाने धर्मनिरपेक्ष-नागरिकसंहिता भवेदिति विषयम् सबलं प्रतिपादितम्।

बांग्लादेशस्य उल्लेखं कुर्वन् प्रधानमन्त्री उक्तवान् यत् तत्र घटितासु घटनासु परिवेशी देशत्वेन भारतस्य चिन्ता स्वाभाविकी अस्ति। श्रीमोदी आशां प्रकटितवान् यत् बांग्लादेशे स्थिति: शीघ्रातिशीघ्रं सामान्या भविष्यतीति। तेनोक्तं यत् भारते जना: बांग्लादेशे अल्पसंख्यकानां सुरक्षामभिचिन्त्य सशंकिता: सन्तीति।

प्रधानमन्त्रिणा पेरिस ओलम्पिक-इति क्रीडाकुम्भे भागगृहीतार: क्रीडका: वर्धापिता:। तेन विश्वासो व्यक्तीकृत: यत् अस्मत् क्रीडका: नूतन संकल्पै: नवविश्वासै:, नूतन लक्ष्यैश्च सह अग्रे यास्यन्तीति। श्रीमोदिना उक्तं यत् षड्त्रिंशदधिक-द्विसहस्रतमवर्षीय: ओलम्पिकाख्य: क्रीडाकुम्भ: अस्मद्देशे भवेदिति आशया सर्वविधसन्नद्धता: सन्ति नियोजिता:।

**फोगाट्-कास्**

मल्लयुद्ध क्रीडिकायाः विनेश फोगाट् इत्यस्याः संयुक्तरजतपदकस्य आशायाः तदा समाप्तिः अभवत् यदा क्रीडा-मध्यस्थता-न्यायालयेन सी.ए.एस. इत्यनेन पेरिस ओलम्पिकतः अयोग्यतां विरुध्य तस्याः याचिका अस्वीकृता। सी.ए.एस.-सङ्घस्य तदर्थविभागेन तस्याः प्रकरणस्य वादश्रवणस्य कस्मिंश्चित् दिनेषु एव याचिका अस्वीकृता। अवधेयं वर्तते यत् विनेश इत्यनया क्यूबादेशस्य मल्लयुद्ध क्रीडिकया युस्नेलिस् गुज्मान् लोपेज् इत्यनया सह संयुक्तरूपेण रजतपदकस्य कृते क्रीडा-मध्यस्थता-न्यायालस्य सम्मुखे आग्रह: कृत: आसीत् ।

**प्रधानमन्त्री/विश्वनत[illegible]र:**

प्रधानमन्त्री नरेन्द्रमोदी अद्य स्वातन्त्र्यदिवसस्य अवसरे विश्वस्य विभिन्न नेतृन् प्रति तेषां शुभकामनायै धन्यवादान् प्रकटितवान् । एकस्मिन् सामाजिकसञ्जालीय-सन्देशे प्रधानमन्त्रिणा मालदीवस्य राष्ट्रपतिः डॉ. मोहम्मद मुइज्जु इत्यमुं प्रति फ्रांस्देशस्य राष्ट्रपतिं इमैनुएल मैक्रों इत्यमुञ्च प्रति तेषां शुभकामनायै आभारभाव: प्रकटित:, एतै: देशैः सह द्विपक्षीयसम्बन्धस्य प्रशंसा च कृता। जनानां हिताय सहकार्यस्य महत्त्वं अपि सः प्रकाशितवान्। प्रधानमन्त्री नेपाल-भूटान-देशयोः स्वसमकक्षेभ्यः अपि तेषां शुभकामनायै धन्यवादं प्रकटितवान्।

प्रधानमन्त्री नरेन्द्रमोदी अद्य महानदार्शनिक, विचारक, आध्यात्मिक नेतुः श्रीओरबिन्दो वर्यस्य जन्मदिवसस्य अवसरे श्रद्धाञ्जलिं समर्पितवान्। एकस्मिन् सामाजिकसञ्जालीय सन्देशे श्रीमोदी अवदत् यत् श्री ओरबिन्दो वर्यस्य विचार: राष्ट्रजागरणस्य उपरि बलं ददाति।

**बंगाल प्रदर्शनम् :**

पश्चिमबङ्गे कोलकातानगरस्य आर जी कर चिकित्सा महाविद्यालये चिकित्सिकायाः निर्ममबलात्कारस्य हत्यायाः च विरोधे समाजस्य समस्तवर्गस्य जनाः मार्गेषु एकत्रिताः अभवन्। यदा मध्यरात्रि काले आर जी कर चिकित्सामहाविद्यालयस्य बहिः बहुसंख्यायां जनाः विरोधं कुर्वन्ति स्म तदा उपद्रविनां समूहः चिकित्सकानां विरोधप्रदर्शनस्थले आक्रमणं कृतवान्। उपद्रविभि: चिकित्सामहाविद्यालयस्य आधारभूतसंरचना, औषधयः, उपकरणानि च नष्टी कृतानि तथा च तैः पुरुष-महिला-चिकित्सा विभागः अपि नष्टी कृतः।

उपद्रविसु नियन्त्रणं कुर्वन् कोलकाता आरक्षी दलस्य उपायुक्त: बहवः आरक्षि कर्मचारिणः व्रणिताः। पश्चिमबङ्गस्य राज्यपालः डॉ. सी.वी.आनन्द बोसः अद्य आर जी कर चिकित्सा महाविद्यालयस्य निरीक्षणं कृतवान्।